# संस्कृत वार्ता:

दिनाङ्क : 03.06.2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- केन्द्रीयमन्त्रिमण्डलेन विमानन-परिवहन-मार्ग-आधारभूतसंरचनाक्षेत्रेषु एटीएफ-मूल्यस्य स्थिरीकरणार्थं तैलविपणनसमवायेभ्य: सहस्रकोटिरूप्यकाणां-आयव्ययसहायतां प्रदातुं कतिपयाः महत्त्वपूर्णाः योजनाः अनुमोदिताः।
- कर्नाटकराज्यस्य नूतनमुख्यमन्त्री डी.के. शिवकुमारः शपथग्रहणं कृतवान्।
- पश्चिमबङ्गालस्य तृणमूल कांग्रेसदलात् निष्कासितः टी.एम्.सी. विधायकः ऋतब्रत बनर्जी इत्यनेन उक्तं यत् तस्य पक्षे प्रायः षष्टिः विधायकाः सन्ति।
- दिल्लीनगरस्य मालवीयनगरे विश्रान्तिनिलये भीषणाग्निकाण्डः, एकविंशतिः जनाः मृताः।
- भारतं पञ्चविंशत्यधिकद्विसहस्रतमे वर्षे विश्वस्य द्वितीयं बृहत्तमं सौरविकासविपणकम् अभवत्।

---

<u>मन्त्रिमण्डलस्य निर्णयाः</u>

केन्द्रीयमन्त्रिमण्डलेन विमानन-परिवहन-मार्ग-आधारभूतसंरचनाक्षेत्रेषु कतिपयाः महत्त्वपूर्णाः योजनाः अनुमोदिताः।

पश्चिम-एशियासंकटकारणेन वर्धितेषु इन्धनमूल्येषु भारतीयविमानसेवानां कृते विमान-ईन्धनस्य अर्थात् एटीएफ-मूल्यस्य स्थिरीकरणार्थं तैलविपणनसमवायेभ्य: सहस्रकोटिरूप्यकाणां - आयव्ययसहायतां प्रदातुं प्रशासनं निर्णयम् कृतवत् । सूचना-प्रसारणमन्त्री अश्विनीवैष्णवः अवदत् यत् एतेन विमाननक्षेत्रसम्बद्धा: प्रायः सप्तसप्ततिलक्ष-आजीविकाः सुरक्षिताः भविष्यन्ति। एषा सहायता-योजना षट्त्रिंशन्मासपर्यन्तं प्रवर्तिष्यते।

मन्त्रिमण्डलेन दिल्ली-निकटवर्ति -क्षेत्रे वायुप्रदूषणनियन्त्रणार्थम् अपि एकस्याः बृहत्याः योजनायाः अनुमोदनं कृतम्। नवसहस्र-पञ्चशत-पञ्चाशीति-कोटिरूप्यक-व्यययुक्तायाः अस्याः योजनायाः अन्तर्गतं बीएस-चतुर् अथवा तत्पूर्वमानकयुक्ताः ट्रक-बसयानानि बीएस-षट् अथवा विद्युत्चालितयानैः प्रतिष्ठास्यन्ते। द्विवर्षीय-योजनायां प्रायः द्विलक्षं ट्रकयानानि षोडशसहस्रं बसयानानि च प्रतिष्ठापयितुं लक्ष्यं निर्धारितम्।

आर्थिकसम्बद्धया मन्त्रिमण्डलीयसमित्या ओडिशाराज्ये रामेश्वरात् पारादीपपर्यन्तं त्रिषष्ट्यधिक-शतकिलोमीटर-परिमितस्य नूतनतटीय-राजमार्गनिर्माणाय अनुमतिः प्रदत्ता। अष्टसहस्रत्रिशत-कोटिरूप्यकाधिक-व्यययुक्तायाः अस्याः परियोजनायाः सम्पन्नतया उभयोः स्थानयोः मध्ये यात्राकालः प्रायः सार्धद्विहोरा न्यूनीभविष्यति।

एतदतिरिक्तं समित्या बिहारराज्ये राष्ट्रीयराजमार्गयोः एकत्रिंशत् तथा एकत्रिंशत् अधिक द्विशतस्य च इत्येतयोः खगड़िया-पूर्णिया-खण्डस्य चतुर्-पथ-परियोजनापि अनुमोदिता। प्रायः त्रिसहस्र-नवशत-षट्त्रिंशत्-कोटिरूप्यक-व्यययुक्ता एषा परियोजना राज्यस्य प्रमुखाणां आर्थिक-सामाजिककेन्द्राणां मध्ये सम्पर्कं सुदृढं करिष्यति।

------------------------------------------------

## आदिवासिसम्मेलनम्

राष्ट्रपतिः द्रौपदी मुर्मूः अद्य राष्ट्रिय-आदिवासिसम्मेलनस्य उद्घाटनं कृतवती। नवदिल्याम् आयोजितायाम् एकीकृतजनजातीय-विकाससमवायानां तथा एकीकृतजनजातीय-विकासायोगस्य च विस्तारविषयिकायां समायोजितायां सभायां राष्ट्रपतिः अवदत् यत् देशव्यापिनः जनजातीयसमाजस्य संस्कृतिः अत्यन्ता समृद्धा अस्ति, अतः जनजातीयसमुदायस्य उन्नत्यर्थाः विशेषप्रयत्नाः करणीयाः।

तया उक्तं यत् विकासकार्याणि अन्तिमगृहं यावत् अन्तिमग्रामं यावत् च अवश्यं प्राप्नुयुः। राष्ट्रपतिः चिन्ताम् अपि व्यक्तवती यत् अद्यापि केचन जनजातीयवर्गाः शासनस्य विविधाभिः योजनाभिः अनभिज्ञाः सन्ति।

राष्ट्रपतिः सर्वासाम् संस्थानां हितधारकान् आहूतवती यत् जनजातीययुवभ्यः सम्मानजनकजीविकायाः तथा प्रत्येकं जनजातीयबालकाय विद्यालयशिक्षायाः सुनिश्चितीकरणं क्रियताम्।

तया एतदपि प्रतिपादितं यत् जनजातीययुवानः क्रीडाकलापेषु सहभागितायै प्रोत्साहिताः भवेयुः।

-----------------------------------------------------

**कर्नाटक: मुख्यमन्त्री**

कर्नाटकराज्यस्य नूतनमुख्यमन्त्री डी.के. शिवकुमारः शपथग्रहणं कृतवान्। कर्नाटकराज्ये काङ्ग्रेस-विधानमण्डल-दलस्य नेता डी.के. शिवकुमारः अद्य बेङ्गलूरुनगरे राज्यस्य पञ्चविंशतितमः मुख्यमन्त्रिरूपेण शपथग्रहणं कृतवान्। राज्यपालः थावरचन्द-गहलोत: तस्मै पदस्य गोपनीयतायाश्च शपथं प्रदापितवान् । वरिष्ठकाङ्ग्रेसनेता डॉ. जी. परमेश्वरः उपमुख्यमन्त्रिपदेन शपथं गृहीतवान्, अन्ये च द्वादश-मन्त्रिणः अपि मन्त्रिपरिषदि सम्मिलिताः।

प्रधानमन्त्री नरेन्द्रमोदी, मुख्यमन्त्रिणे शुभकामना: प्रदत्तवान्।

-----------------------------------------------------

**पश्चिमबङ्गालस्य**

पश्चिमबङ्गालस्य पूर्वसत्तारूढदले तृणमूलकाङ्ग्रेले आन्तरिकमतभेदाः प्रतीताः। दलात् निष्कासितः टी.एम्.सी. विधायकः ऋतब्रत बनर्जी इत्यनेन उक्तं यत् तस्य पक्षे प्रायः षष्टिः विधायकाः सन्ति। अस्य कथनस्य कारणेन राज्यविधानसभायां सत्तासन्तुलनपरिवर्तनस्य सम्भावनां प्रति चर्चाः तीव्राः प्राप्ताः ।

तस्य समूहेन विधानसभायाः -अध्यक्षाय रथेन्द्र बोस महोदयाय पत्रं प्रेषितं स्वदलस्य “वास्तविक-तृणमूलकाङ्ग्रेस” इति नाम्ना मान्यतां दातुम् आग्रहः कृतः।

प्रत्युत्तररूपेण तृणमूलकाङ्ग्रेसेण शोभनदेव चट्टोपाध्यायः सदनस्य नेता, आशिमा पात्रा तथा नयना बन्दोपाध्याय: उपनेत्र्यौ, फिरहाद हकीमः च मुख्यसचेतकरूपेण घोषिताः।

अस्मिन्नन्तरे पूर्वमुख्यमन्त्री ममता बनर्जी कोलकातानगरे आयोजितायां जनसभायां भारतीयजनतापार्टी इत्यस्य उपरि दलविभाजनस्य षड्यन्त्ररचनायाः आरोपं कृतवती। एतेषां राजनैतिकघटनाक्रमाणां प्रति सम्पूर्णराज्यस्य दृष्टिः केन्द्रीभूता वर्तते।

-----------------------------------------------

## मालवीयनगर-अग्निकाण्ड:

दिल्लीनगरस्य मालवीयनगरे विश्रान्तिनिलये भीषणाग्निकाण्डः, एकविंशतिः जनाः मृताः। राष्ट्रीयराजधान्याम् दिल्ल्याम् मालवीयनगरक्षेत्रस्य एकस्मिन् विश्रान्तिनिलये भीषणाग्निकाण्डे एकविंशतिः जनाः मृत्युमुपगताः। अनेके च जनाः आहताः अभवन्। दक्षिणदिल्ल्यारक्षि विभागस्य उपायुक्तः अनन्तमित्तलः अवदत् यत् अग्निशमनविभागस्य अष्टभिः वाहनैः सह अग्निः नियन्त्रितः। आरक्षिणां -, अग्निशमनस्य - तथा अन्य-आपत्कालिकसेवानां संयुक्तप्रयत्नैः चत्वारिंशदधिकाः जनाः सुरक्षितरूपेण उद्धृताः चिकित्सोपचारार्थं च चिकित्सालयेषु प्रेषिताः।

प्रधानमन्त्री नरेन्द्रमोदी घटनायाः विषये गहनं दुःखं व्यक्तीकृतवान् । तेन मृतकाणां परिजनानां कृते प्रधानमन्त्रिराष्ट्रियराहतनिधेः द्वि-द्वि लक्षरूप्यकाणि तथा आहतानां कृते पञ्चाशत्-पञ्चाशत् सहस्ररूप्यकाणां आर्थिकसहायतायाः घोषणा कृता।

राष्ट्रपतिः द्रौपदी मुर्मु, उपराष्ट्रपतिः सी.पी. राधाकृष्णन्, गृहमन्त्री अमितशाहः तथा दिल्लीराज्यस्य मुख्यमन्त्री रेखा गुप्ता अपि अस्मिन् दुःखदे घटनाक्रमे शोकं प्रकटितवन्तः। सर्वैः नेतृभिः शोकसन्तप्तपरिजनान् प्रति गहनसंवेदना व्यक्ता, आहतानां शीघ्रस्वास्थ्यलाभाय च प्रार्थना कृता।

-----------------------------------------------

## प्रहलाद-सौर-ऊर्जा:

वार्षिक-सौर-क्षमतावृद्धौ भारतं अमरीकाम् अतिक्रमितवत्। भारतं पञ्चविंशत्यधिकद्विसहस्रतमे वर्षे विश्वस्य द्वितीयं बृहत्तमं सौरविकासविपणकम् अभवत्। भारतं स्थापित-सौर-क्षमतायाः उल्लेखनीयं पञ्चपञ्चाशत्यधिकशत् गीगावाट्-परिमितं अतिक्रमितम् अस्ति, येन देशस्य पञ्चाशत् प्रतिशतं जीवाश्महीन-इन्धन-क्षमतायाः लक्ष्यं साधयितुं, नियतसमयात् पूर्वमेव तस्य राष्ट्रिय-निर्धारितं योगदानं पूरयितुं च साहाय्यं भवति। केन्द्रीय-नवीन-नवीकरणीय-ऊर्जा-मन्त्री प्रल्हाद-जोशी-वर्यः अद्य उक्तवान् यत् देशस्य सौर-विकासगाथा वैश्विक-मानदण्डानि स्थापयति, सुदृढ-नीति-समर्थनेन, नवान्वेषणस्य, विश्व-स्तरीय-आधारिक-संरचनायाः च माध्यमेन अभिलेख-क्षमतावर्धनानि च प्रेरयति।

----------------------------------------------

## अरावलीपर्वतश्रेण्याः

अरावलीपर्वतश्रेण्याः सीमाङ्कनसमीक्षार्था सर्वोच्चन्यायालयेन विशेषज्ञसमितिः निर्मिता सर्वोच्चन्यायालयेन अरावलीपर्वतश्रेण्याः परिभाषा-सीमाङ्कन-सम्बद्धविषयाणां स्वतन्त्रसमीक्षार्थम् उच्चाधिकारयुक्तायाः विशेषज्ञसमितेः घटनस्य निर्देशः प्रदत्तः। अस्याः समितेः अध्यक्षतां भारतीय-वानिकी-अनुसन्धान-शिक्षापरिषदः महानिदेशिका कञ्चनदेवी वहिष्यति।

न्यायालयेन समितये चालितवर्षस्य अगस्तमासस्य एकत्रिंशत्तमदिनाङ्कपर्यन्तं स्वप्रतिवेदनं समर्पयितुम् आदेशः प्रदत्तः। सर्वोच्चन्यायालयेन उक्तं यत् अरावली-पारिस्थितिकतन्त्रस्य संरक्षणसम्बद्धानां महत्त्वपूर्णप्रश्नानां समाधानार्थं निष्पक्षं वैज्ञानिकं तथ्याधारितं च मूल्याङ्कनम् अत्यावश्यकम् अस्ति।

उल्लेखनीयम् अस्ति यत् गतवर्षस्य अक्टोबरमासे न्यायालयेन पर्यावरणमन्त्रालयस्य प्रतिवेदनस्य कार्यान्वयनं स्थगनम् कृत्वा स्वतन्त्रविशेषज्ञैः नवीनसमीक्षां कर्तुम् आदेशः प्रदत्तः । अपेक्ष्यते यत् अस्याः समितेः प्रतिवेदनम् अरावलीक्षेत्रस्य संरक्षणे, विकासे तथा पर्यावरणीयसन्तुलनस्य रक्षणे भविष्यनिर्णयेषु महत्त्वपूर्णां भूमिकां निर्वहिष्यति।

----------------------------------------------

## चिरागपासवान

प्रधानमन्त्री नरेन्द्रमोदी अद्य केन्द्रीयमन्त्रिणः चिरागपासवानस्य लेखं सामाजिक-अन्तर्जालमाध्यमेन प्रदर्शितवान् । तेन उक्तं यत् लद्दाखप्रदेशे प्राप्तम् अद्वितीयम् बेरीफ़लम् नवीनावसराणां विकासस्य च प्रतीकः अस्ति। लेखे लद्दाखस्य उद्यमशीलतया तथा मूल्यवर्धनद्वारा विकासस्य नूतनद्वाराणि उद्घाटितानि इति प्रकाशितम्।

।। इति वार्ता: ।।